ISSN : 0975-1769

# संस्कृतविमर्शः

( यू.जी.सी. केयर-मानिता विद्वत्परिशीलिता अन्ताराष्ट्रीया शोधपत्रिका )

(An UGC-CARE Listed Peer-Reviewed International Research Journal)

## नवोत्कर्षः

अङ्कः 23 ( जुलाई 2022-दिसम्बर 2022 ) वर्षम् 2024

प्रधानसम्पादकः

प्रो. श्रीनिवास वरखेड़ी

कुलपतिः

सम्पादकः

डॉ. गणेश ति. पण्डितः

केन्द्रीयसंस्कृतविश्वविद्यालयः

संसदः अधिनियमेन स्थापितः

देहली

# संस्कृतविमर्शः

( An International Refereed & Peer-Reviewed
Research Journal, UGC-CARE Listed )

## नवोत्कर्षः

अङ्कः 23 ( जुलाई 2022 - दिसम्बर 2022 ) वर्षम् 2024

प्रधानसम्पादकः
**प्रो. श्रीनिवास वरखेड़ी**
कुलपतिः

सम्पादकः
**डॉ. गणेश ति. पण्डितः**

**केन्द्रीयसंस्कृतविश्वविद्यालयः**
**संसदः अधिनियमेन स्थापितः**
**देहली - 110 058**

प्रकाशकः
कुलसचिवः
**केन्द्रीयसंस्कृतविश्वविद्यालयः**
(संसदः अधिनियमेन स्थापितः)
56-57, इन्स्टीट्यूशनल् एरिया, जनकपुरी, नवदेहली-110058
011-28524993, 28521994, 28520977
emial : res-pub@csu.co.in
website : www.sanskrit.nic.in

© केन्द्रीयसंस्कृतविश्वविद्यालयः

ISSN : 0975-1769

संस्करणम् : 2024

मूल्यम् - 300.00

**ग्राहकताशुल्कम्**
त्रैवार्षिकम् - 1800.00
पञ्चवार्षिकम् - 3000.00

मुद्रकः
डी.वी. प्रिंटर्स
97-यू.बी. जवाहर नगर, दिल्ली-110007

# SAṂSKṚTA-VIMARŚAḤ

(An International Refereed & Peer-Reviewed
Research Journal, UGC-CARE Listed)

## NAVOTKARṢAḤ

**Vol. 23** **(July 2022 - December 2022)** **Year 2024**

Editor in Chief
**Prof. Shrinivasa Varakhedi**
Vice-Chancellor

Executive Editor
**Dr. Ganesh T. Pandit**

**CENTRAL SANSKRIT UNIVERSITY**

(Established by an Act of Parliament)

**Delhi**

Publisher:
Registrar
**Central Sanskrit University**
56-57, Institutional Area, Janakpuri,
New Delhi - 110058 (India)
E-mail : res-pub@csu.co.in
website : www.sanskrit.nic.in

© Central Sanskrit University

ISSN : 0975-1769

Edition : 2024

Rs. 300.00

**Subscription**

Three Years : 1800

Five Years : 3000

Printed by :
D.V. Printers
97-U.B., Jawahar Nagar, Delhi-110 007

# परामर्शदातृ-समितिः

1. **प्रो. बनमाली बिश्वालः**
   अधिष्ठाता (शैक्षणिकः)
   केन्द्रीयसंस्कृतविश्वविद्यालयः,
   नवदेहली-110058

2. **प्रो. ललित कुमार त्रिपाठी**
   अधिष्ठाता (शोधप्रभागः)
   गङ्गानाथझापरिसरः
   केन्द्रीयसंस्कृतविश्वविद्यालयः
   प्रयागराजः, उत्तरप्रदेशः

3. **प्रो. गोदावरीमिश्रः**
   सङ्कायाध्यक्षः - SBSPCR
   नालन्दाविश्वविद्यालयः, राजगृहम्,
   बिहारः, पिन-803116

4. **प्रो. शशिप्रभाकुमारः**
   सङ्कायाध्यक्षा,
   श्रीशङ्कराचार्यसंस्कृतमहाविद्यालयः,
   नवदेहली, पिन-110001

5. **प्रो. रमेशकुमारपाण्डेयः**
   शोधविभागः,
   श्रीला.ब.शा.रा.सं.वि.वि., नवदेहली,
   पिन-110016

6. **प्रो. राधाकृष्ण सि.एस्.**
   संस्कृतविभागः,
   पाण्डेचेरिविश्वविद्यालयः, पाण्डेचेरी
   पिन- 605014

# Advisory-Board

1. **Prof. Banmali Biswal**
   Dean (Academic)
   Central Sanskrit University,
   New Delhi-110 058

2. **Prof. Lalit Kumar Tripathi**
   Dean (Research)
   Ganganath Jha Campus
   Central Sanskrit University,
   Prayagraj (U.P.) Pin - 211002

3. **Prof. Godavri Mishra**
   Dean, SBSPCR,
   Nalanda University,
   Rajgir (Bihar) Pin - 803116

4. **Prof. Shashi Prabha Kumar**
   Dean,
   Shri Shankaracharya Sanskrit Mahavidyalaya,
   New Delhi, Pin-110001

5. **Prof. Ramesh Kumar Pandey**
   Department of Research,
   LBS National Sanskrit University
   New Delhi, Pin - 110016

6. **Prof. Radhakrishna P.**
   Deparment of Sanskrit
   Pondicherry University
   Pondicherry-605014

# सम्पादकीयम्

राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा केन्द्रीयसंस्कृतविश्वविद्यालयस्य गुणवत्तां परीक्ष्य A++ इत्येषा सर्वोत्कृष्टा श्रेणी प्रदत्ता वर्तते इति विदितमेव समेषाम्। ततश्च अयं विश्वविद्यालयः विश्वविद्यालयानुदानायोगस्य A क्रमान्तर्गतायां विश्वविद्यालय-पट्टिकायामपि राजतेतमाम्। विश्वविद्यालयस्यास्य माननीयकुलपतीनाम् आचार्य श्रीनिवासवरखेडीवर्याणां मार्गदर्शनेनैव अयम् अभिनवोत्कर्षः सम्प्राप्तः वर्तते। असौ विश्वविद्यालयः तेषां मार्गदर्शनं प्रतिपदं स्वीकृत्य पठनपाठनप्रकाशनसंशोधनादिषु सर्वेषु शैक्षिककार्येषु गुणवत्तां परिरक्षितुम् अनुक्षणं प्रयतते। विशिष्य अस्मिन् शैक्षिकसत्रे शिक्षायाः गुणवत्तापरिरक्षणाय परिवर्धनाय च शैक्षिकगुणोत्कर्षवर्षं (2023-24) सार्थकोपक्रमैः समाचरति। शैक्षिकगुणोत्कर्षः नामिका सप्तदिनव्यापिनी एका कार्यशाला अपि नवम्बर मासस्य द्वाविंशतितमात् दिनाङ्कात् अष्टाविंशति- दिनाङ्कं यावत् मुख्यालये समायोजिता। स्वाध्यायः शिक्षा शोधः इति शैक्षिकोत्कर्षहेतून् अधिकृत्य इयं कार्यशाला अस्माभिः समायोजिता। एवं पठनपाठनप्रकाशनसंशोधनादिषु कार्येषु विशिष्टं ध्यानं केन्द्रीकरोति सपरिसरः केन्द्रीयसंस्कृतविश्वविद्यालयः। विशिष्य भारतीयवाङ्मयप्रचारकार्येषु आबहोः कालात् प्रकाश्यमाना संस्कृतविमर्शः इत्येषा शोधपत्रिका भृशमुपकरोति। लक्ष्यकेन्द्रिता विविधविद्याधारित-शोधलेखैः शोभमाना च एषा शोधपत्रिका नैरन्तर्येण सारस्वतलोकं प्रकाशयन्ती विद्यते। विश्वविद्यालयानु-दानायोगस्य रक्षितसूच्याम् उल्लिखितायाम् अस्यां पत्रिकायां संस्कृतेन सह आङ्ग्लभाषायां हिन्दीभाषायां च उपनिबद्धाः लेखाः लसन्ति।

तेलुगुव्याकरणेन सह संस्कृतव्याकरणस्याभिसम्बन्धः, आहारविवेके स्वास्थ्य-सिद्धिः, ङ्याप्प्रातिपदि-कादिति सूत्रे दीक्षितनागेशमतयोः विचारानुशीलनम्, Living Traditions of Advaita Vedanta, प्राचीन भारतीय मूल्याङ्कन प्रणाली विमर्श, Digital Conservation and Preservation of Sanskrit Heritage इत्यादयः शोधलेखाः अस्मिन् अङ्के सन्ति। एवं संस्कृत-हिन्दी-आङ्ग्लभाषासु उपनिबद्धस्य अस्य अभिनवोत्कर्षद्योतकस्य अङ्कस्य सम्पादनकर्मणि प्रतिपदं मार्गदर्शनं कृतवद्भ्यः कुलपतिभ्यः सम्पादकगणः सनमोवाकं धन्यवादान् व्याहरति। प्रकाशनकार्येषु विश्वविद्यालयस्य कुलसचिवाः आचार्य रा.गा. मुरलीकृष्णवर्याः अपि काले काले

अभिप्रेरयन्ति इत्यत: तेभ्योऽपि धन्यवादान् व्याहराम:। कुलपतीनां विशेषकार्याधिकारी कार्यक्रमयोजनानुभागयो: निदेशक: प्रो. मधुकेश्वरभट्टवर्य:, प्रकाशनानुभागस्य डॉ. पवनव्यासवर्य:, डॉ. छोटी बाई मीना वर्या, श्रीमती सोनिया, कुमारी रीना प्रभृतय: साहाय्यमकुर्वन्। अत: तेभ्य: अपि धन्यवादान् समर्पयाम:। विशिष्य परामर्शकमण्डल्या: सदस्यान् समीक्षकान् च पौन:पुन्येन स्मराम:। तेषां सहयोगेन एव एषा पत्रिका प्राकाश्यतां यातीति शम्।

**सम्पादकगण:**

# विषयानुक्रमणिका


परामर्शदातृ-समितिः *v*

**Advisory Board** *vi*

सम्पादकीयम् *vii*

## संस्कृत-संभागः

1. येऽनूचानास्ते कवयः, योऽनूचानः स नो महान् इत्यनयोः श्रुतिस्मृतिवाक्ययोः विश्लेषणम् 1
   –डॉ. गणेश ति पण्डितः
2. ङ्याप्प्रातिपदिकादिति सूत्रे दीक्षितनागेशमतयोः विचारानुशीलनम् 7
   –डॉ. शम्भुनाथ भट्टः
3. तेलुगुव्याकरणेन सह संस्कृतव्याकरणस्याभिसम्बन्धः 16
   –डॉ. विदुषी बोल्ला
4. आहारविवेके स्वास्थ्यसिद्धिः आहारशुद्धौ सत्त्वशुद्धिः 25
   –डॉ. नवीन भट्ट
5. त्रिविधं तपः –डॉ. जि. नरसिंहुलु 31
6. वैश्विकान्तरिकाशान्तये प्रज्ञापराधः 40
   –डॉ. अमृताकौरः
7. नैषधचरितालोके वैदिकदेवस्य स्वरूपम् 44
   –टुम्पा जाना
8. आयुर्वेदे योगतत्त्वम् –डॉ. गोबिन्दः दासः 57
9. स्वास्थ्यमौषधम् –डॉ. चक्रधरमेहेरः 67
10. जयरामन्यायपञ्चाननकृता काव्यप्रकाशटीका-एकः विमर्शः 73
    –डॉ. अनसूया महारणा
11. शिशुपालवधस्य सर्वङ्कषाटीकायाः कोशोद्धृतीनां प्रामाणिकताविचारः –डॉ. मृत्युञ्जयगराँइ 83

12. **नाऽभिधालक्षणाभ्यां व्यञ्जनायाः गतार्थत्वम्** 94
-राजकुमार-मण्डलः

13. **भक्तिमार्गालोके श्रीजीवगोस्वामी** 105
-अमलकुमार कर

14. **अर्चावतारस्य वैदिकत्वप्रदर्शनं बुद्धनिर्वाणकाला-पेक्षयार्वाचीनत्वनिरसनञ्च - एकं समीक्षणम्** 114
-चन्दन-मुखार्जी

15. **उपदेशसाहस्र्यनुसारम् अद्वैतेतरवादीनां मतपरीक्षणं स्वमतस्थापनञ्च** 126
-कार्त्तिकरुइदासः

16. **षष्ठीसमासनिषेधशास्त्राणां समीक्षणम्** 142
-उत्तम-माझिः

17. **पाणिनीयव्याकरणे प्रकृतिवदनुकरणे ज्ञापकानामावश्यकता** 154
-पल्लवी-मालिकः

18. **स्वं रूपं शब्दस्याशब्दसंज्ञा इति सूत्रस्य समीक्षणम्** 166
-डा. मलयपोडे

19. **स्त्रीधनविषये प्राचीनधर्मशास्त्रेण सहार्वाचीनहिन्दु विधेस्तुलनात्मकमध्ययनम्** 178
-डॉ. अञ्जन-दासः

20. **उपनिषत्सु निहितप्रमुखतत्त्वानां विवेचनम्** 184
-डॉ. विशम्बरदासः


## हिन्दी संभाग


21. **प्राचीन भारतीय मूल्यांकन प्रणाली विमर्श** 191
-प्रो. लीना सक्करवाल

22. **काव्यप्रकाशोक्त 'प्रतिकूलविभावादिग्रह' दोष परिशीलन** 206
विशेषतः काव्यप्रकाश की 'बालबोधिनी' टीका के सन्दर्भ में
-शिवानी

23. **समकालीन संस्कृत महिला लेखन और उनके काव्य उपमान** 214
-डॉ. अजय कुमार मिश्र

24. **पश्चिम बंगाल में उच्च माध्यमिक विद्यालयों में छात्र अशांति की समस्या पर एक अध्ययन** 229
-श्रीकान्त हाजरा

25. **हनूमान्-चालीसास्तोत्रस्य गेयात्मकः संस्कृतानुवादः (सन्तकवि गोस्वामी तुलसीदासविरचितम्)** 239
-अनुवादकः डॉ० सत्यनारायणहेच्. के.

26. **संयम स्वरूप विमर्श** -योगिन्द्रा देवी 243

27. **प्रादेशिक शब्दों की भाषा यात्रा में प्राकृत का योगदान** 253
-डॉ. रजनीश शुक्ल

## English Section

28. **Living Traditions of Advaita Vedānta** 265
-Dr. Shakuntala Gawde

29. **Digital Conservation and Preservation of Sanskrit Heritage : Bridging the Past and Future** 283
-Dr. Rautmale Anand S.

30. **Melodic Maternity : Exploring Gayatri Mantra's Influence in Garbha Samvad** 298
- Dr Bhairavi Dixit

31. **Generative Artificial Intelligence and gamification for enhancing student engagement and volition for the promotion of the Bhartiya Knowledge System** 314
- Dr Ramesh C Sharma
- Dr Madan K Jha

32. **The Mysterious Fact of Number - 33 (33 Crore Gods and Goddesses)** 331
- Abhishaik Chitraans
-Ankakshr Miracless

33. **The Logical Conclusion of Karmayoga Philosophy of the Bhagavadgītā** 335
-Dr. Arpit Kumar Dubey
-Dr. Kamini Kumari

✦✦✦

 ISSN : 0975-1769

# आयुर्वेदे योगतत्त्वम्

-डॉ. गोबिन्दः दासः*

महाकविना कालिदासेन कुमारसम्भवे उक्तम्- 'शरीरमाद्यं खलु धर्मसाधनमिति'।[1] धर्मस्तु कायेन वाचा बुद्ध्या धनादिना च बहुभिः साध्यते, तेषु च वपुरेव मुख्यं साधनम्। सति देहे धर्मार्थकाममोक्षलक्षणाश्चतुर्वर्गाः साध्यन्ते। बलहीनः जनः न किमपि कर्तुं शक्नोति। मुण्डकोपनिषदः मते- 'नायमात्मा बलहीनेन लभ्यः'।[2] निर्बीजः पुरुषः शक्तिहीनो जनो वा आत्मानुसन्धाने सततमसमर्थं भवति। निरोगशरीरलाभाय तथा आत्मलाभाय शरीरचर्चा करणीया। परन्तु शरीरं व्याधिमन्दिरं भवति। अत्र सर्वे रोगाः निवसन्ति। ते अपशक्तयः यथा शरीररूपकं गृहं प्रविष्टुमसमर्थाः भवेयुः। अतः शरीरस्य यत्नं करणीयम्। तदर्थं सन्ति बहवः उपायाः। तेषु उपायेषु योगायुर्वेद अन्यतमः।

√अयुज् समाधौ, √अयुज् संगमने, √युजिर् योगे वेति धातोः 'घञ्' प्रत्यये योगे योगशब्दस्य निष्पत्तिर्भवति। 'भवतापेन तप्तानां योगो हि परमौषधमि'ति वचनानुसारं संसारस्य मृगमरीचिकायां व्याकुलितान्तःकरणवतां जनानां कृते योग एव परमौषधस्य कार्यं करोति। तस्मात्महर्षिपतञ्जलिना परमौषधस्य कार्यं कुर्वन् योगः चित्तवृत्तिनिरोध[3]त्वेन परिभाषितः। चित्तस्य बाह्याभ्यन्तरविषयाणां परित्यागपूर्वकं स्वकीयस्वरूपे अवस्थानमेव चित्तवृत्तिनिरोध उच्यते, स एव योगरूपेणाभिहितो महर्षिपतञ्जलिना। जनजीवनाय अपेक्षिताः आवश्यकताः पूरयितुं योगः कल्पवृक्षः सदृशः वर्तते। अयं योगः ऐहिकभोगैः सह लोकोत्तरान् भोगान् निखिला विभूतिश्च प्रयच्छति। योगेन साधकः कैवल्यं मोक्षं वा प्राप्नोति। अतो यदि योगशास्त्रं दैनन्दिनजीवनस्याङ्गभूतमिति मत्वा तदनुसारिणीं योगचर्यां यदि कश्चिदाचरति तदा स सर्वदा जीवने स्वस्थ एव

---

* सहायकाचार्यः, संस्कृतविभागः, डेबराथानाशहीदक्षुदिरामस्मृतिमहाविद्यालयः, पश्चिम-मेदिनीपुरः, पश्चिमवङ्गः।

1. कुमारसम्भवम् 5/33
2. मुक्तिकोपनिषद् 3.2.4
3. योगसूत्रम् 1/2

तिष्ठति, दीर्घजीवनञ्च प्राप्नोति। रोगास्तस्य नश्यन्ति, तथा मनुष्यस्य आध्यात्मिक-आधिदैविक-आधिभौतिकेति त्रीणि दुःखानि नश्यन्ति।

को नाम आयुर्वेद इति जिज्ञासायामुच्यते यद्यत्रायुषः अहितकारकाणां व्याधीनां निदानं शमनञ्च विद्यन्ते सः ग्रन्थ आयुर्वेदः।[1] देह-आत्मनोर्योगो जीवनम्, तेन अवच्छिन्नः काल आयुः। यस्मिन् शास्त्रे आयुर्बोधद्वारा आयुष्याणि अनायुष्याणि द्रव्यगुणकर्माणि च ज्ञात्वा तेषां सेवनेन त्यागेन चारोग्येण आयुविषयकं ज्ञानं भवति तदेव आयुर्वेदः।[2] आयुर्वेदीयचिकित्सापद्धतिः न केवलं शुश्रुषाया एव पद्धतिरस्ति अपितु एका सम्पूर्णजीवनपद्धतिरस्ति यस्याः नीति-नियमादीनामनुपालनेन जनाः रोगेभ्यः स्वमेव रक्षित्वा 'जीवेम शरदः शतम्' इत्येवं महामन्त्रं सफलीकर्त्तुं पारयन्ति।

आयुर्वेदाचार्याः योगादिदर्शनशास्त्राणि अनुसृत्य तेषां सिद्धान्तं स्वीकृतवन्तः। तदर्थं तयोः शास्त्रयोर्मध्ये बहुशः साम्यं वर्तते। योगदर्शने यथैव प्रमाणानि सन्ति आयुर्वेदेऽपि तथा। एवं योगे षट्कर्माणां ये प्रतिपाद्यविषयाः ते एव विषयाः आयुर्वेदस्य पञ्चकर्मणि प्रतिपादिताः सन्तीति मे मतिः। योगलक्षणम्, चित्तप्रसादनस्योपायः, चतुर्विधं प्रमाणम्, सृष्टिक्रमः, योगिनां शक्तिः, मोक्षः, फललाभादिषु विषयेषु उभयशास्त्रयोर्मध्येऽपि समत्वमवलोक्यते।

### योगस्य लक्षणम्

आयुर्वेदे योगेन सह मनसः मोक्षेण सहात्मनः सम्बन्धं विविच्य योगस्य लक्षणं कृतम्। तत्र चरकसंहितायां योगेन सह मनसः मोक्षेन सह आत्मनः सम्बन्धं विविच्य योगस्य लक्षणं प्रतिपादितम्। तद्यथोक्तम्-

**आत्मेन्द्रियमनोऽर्थानां सन्निकर्षात्प्रवर्तते।**
**सुखदुःखमनारम्भादात्मस्थे मनसि स्थिरे॥**

**निवर्तते तदुभयं वशित्वं चोपजायते।**
**सशरीरस्य योगज्ञास्तं योगमृषयो विदुः॥**[3]

अनेन लक्षणश्लोकेन चर्काचार्येण आत्मना सह मनसः वशीकरणं हि योग इत्युक्तम्। आत्मना सह इन्द्रियस्य, इन्द्रियेण सह मनसः, मनसा सह अर्थस्य (इन्द्रियग्राह्यविषयस्य) सन्निकर्षवशात् जीवः सुख-दुःखञ्चानुभूयते। यदा जीवस्य

1. हिताहितं सुखं दुःखमायुस्तस्य हिताहितम्।
   मानं च तच्च यत्रोक्तमायुर्वेदः स उच्यते॥ चरकसंहिता, सूत्रस्थानम्. 1/41
2. वाचस्पत्यम् पृ. 778
3. चरकसंहिता, शारीरस्थानम् 1/138-139

आत्मनि मनः स्थिरं भूत्वा निश्चलो भवति तदा सुख-दुःखस्य निवृत्तिर्भवति। अस्यामवस्थायां साधकस्य देहः, मनः, आत्मा सर्वमेव स्वनियन्त्रणाधीनो भवति। आत्मनि मनसि च नियन्त्रता हि 'योगः' इति विदुषामभिमतम्। अतः महर्षिणा चरकेणोक्तमात्मना सह मनसः नियन्त्रणं हि योगः इति। तस्यैव योगस्य लक्षणं कृत्वा महर्षिणा पतञ्जलिना चित्तस्य अन्तःकरणस्य वृत्तेः सर्वतो भावेन निरोध एव योगः इत्युक्तम्।[1]

संसारेऽस्मिन् सुख-दुःखानुभूतीनां कारणं मन इति। चञ्चलता एव मनसः धर्मः। अहितविषये इन्द्रियैः मनसः प्रवृत्तिः दुःखस्य कारणं भवति। एवं हितविषये इन्द्रियैः मनसः प्रवृत्तिः सुखस्य कारणं भवति। आयुर्वेदयोगशास्त्रयोः सुखानुभवानुकूलवेदनारूपेण दुःखानुभवः प्रतिकूलवेदनारूपेण च स्वीक्रियते। इन्द्रियार्थसम्बन्धेन मनसः चञ्चलता जायते। तेन च विविधविषयान् प्रति तस्य प्रवृत्तिर्भवति। प्रकारेणानेन कर्मणः सञ्चयो भवति, पुनः सञ्चितेन कर्मणात्मनः सुख-दुःखे प्रवृत्तिर्भवति। 'गायत्र्याः' 'प्रणवस्य' वा पुनः पुनः साधनया अभ्यासेन वा यदा मन आत्मनि स्थिरो भवति तदा तस्य सर्वाः प्रवृत्तयः स्तब्धाः भवन्ति। अतो मनस एकाग्रतया सुख-दुःखानुभवो न भवति। इयमवस्था मनसः 'वशित्वमि'ति नाम्ना प्रसिद्धा आयुर्वेदशास्त्रेषु। सुख-दुःखस्याभावयुक्ता इयमवस्था 'योगः' संज्ञायां संज्ञितो भवति। 'योगेन सशरीरस्य मनसो वशित्वं चोपजायते' इति महर्षेः चरकस्याशयः। अतः योगावस्थायां मनसः शरीरस्य च वशित्वं स्वीक्रियते।

आयुर्वेदशास्त्रे योगस्वरूपं प्रतिपादयन् आयुर्वेदाचार्यस्य विशेषावधानं वर्तते यत् योगः न मात्रं मनांसि शुद्धीकरोति अपितु कार्यस्य दोषानपि अपाकुरुते। पुनश्च चित्तस्यान्तःकरणस्य वृत्तेः सर्वतो भावेन निरोध एव योग इति पतञ्जलिनः अभिप्रायमस्ति। अनेन प्रमाणितं भवति यद्योगलक्षणप्रतिपादने उभयोः शास्त्रकारयोर्मध्ये केवलं शब्दगतपार्थक्यं विद्यते न तु अर्थगतं वैसादृश्यमिति।

**चित्तप्रसादनस्योपायः**

चरकसंहितायां वैद्यस्य चतस्रः वृत्तयः कथिताः

**मैत्री कारुण्यमार्तेषु शक्ये प्रीतिरुपेक्षणम्।**
**प्रकृतिस्थेषु भूतेषु वैद्यवृत्तिश्चतुर्विधा।।**[2]

वैद्यस्य इमाः चतस्रः वृत्तयः योगसूत्रेऽपि मैत्रीकरुणामुदितोपेक्षारूपं चतुर्विधं चित्तप्रसादानम्- 'मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्त-

1. योगसूत्रम् 1/2
2. चरकसंहिता, सूत्रस्थानम् 9/26

प्रसादनम्'।[1] व्यासभाष्ये आसां चतसृणां वृत्तीनां प्रतिपादनं एवंविधम्- सुख-दुःख-पुण्याऽपुण्यविषयाणां मैत्री-करुणामुदितोपेक्षाणां चित्ते पुनः पुनः अवतारणं चित्तस्य नैर्मल्यं भवतीति। अत्र यथाक्रमं सुखविषयेषु मैत्रीं कुर्यान्न तु ईर्ष्याम्। दुःखविषयेषु कथं नु नामैषां दुःखनिवृत्तिः स्यादिति करुणामेव भावयतः पुरुषस्य पराऽपकार-चिकीर्षाकालुष्यं निवर्तते चित्तस्य। पुण्यवत्प्राणिषु सर्वदा मुदितां तथा हर्षमेव कुर्यान्न तु किमेते पुण्यवन्त इति विद्वेषम्। अपुण्यशीलेषु प्राणिषु चोपेक्षामेव भावयेन्नानुमोदनं न वा द्वेषम्। इत्येवं राजसतामसधर्माणां निवृत्तौ सात्त्विकः धर्मः समुद्भवति। तेन चित्तं प्रसन्नं चैकाग्रं सत् स्थितिपदं लभते। एवं द्वेषरागादिप्रपक्षभूतमैत्र्यादिभावनया समुत्पादितप्रसादं चित्तं संप्रज्ञातादिसमाधियोग्यं संपद्यते। 'तत्र सर्वप्राणिषु सुखसम्भोगापन्नेषु मैत्रीं भावयेत्। दुःखितेषु करुणाम्। पुण्यात्मकेषु मुदिताम्। अपुण्यशीलेषु उपेक्षाम्। एवमस्य भावयतः शुक्लो धर्म उपजायते। ततश्च चित्तं प्रसीदति। प्रसन्नमेकाग्रं स्थितिपदं लभते।'[2] आयुर्वेदशास्त्रे इमाः वृत्तयः एवंविधाः कथिताः-

**मैत्री**- 'मैत्री' शब्दस्यार्थः सौहार्दम्, प्राणिमात्रेषु मित्रता कर्तव्या। योगसूत्रे मैत्र्यादिशब्देन बलसंयमञ्च प्राप्तौ साहाय्यं मिलति। अनेन प्रकारेण रुग्णस्य चरकसंहितायामप्यारोग्यलाभाय औषधिना सह सौहार्दं करणीयमिति कथितम्।

**करुणा**- 'करुणा' शब्दस्यार्थः कृपा दया वा, परदुःखप्रहाणेच्छा। चरकसंहिताया-मप्यस्याः व्याख्या 'आर्तेषु कारुण्यम्' वचनांशे समुपलभ्यते।

**मुदिता**- 'मुदिता' शब्दस्यार्थः हर्षः। चरकसंहितायामपि अस्याः व्याख्या 'शक्ये प्रीति' वचनांशे प्राप्यते।

**उपेक्षा**- 'उपेक्षा' शब्दस्यार्थः त्यागः उदासीनः वा। चिकित्साशास्त्रेऽपि असाध्यरोगस्य उपेक्षाकरणीया इति उक्तम्-

**मैत्री कारुण्यमार्तेषु शक्ये प्रतिरुपेक्षणम्।**
**प्रकृतिस्थेषु भूतेषु वैद्यबुद्धिश्चतुर्विधेति।।**[3] इति

अपि च बृद्धवाग्भटोऽपि कथितम्-

**सर्वत्र मैत्री, करुणाऽऽतुरेषु निरामदेहेषु नृषु प्रमोदः।**
**मनस्युपेक्षा प्रकृति व्रजत्सु वैद्यस्य सद्वृत्तमलङ्करोति।।**[4]

---

1. योगसूत्रम् 1/33
2. योगसूत्रम्, व्यासभाष्यम् 1/33
3. चरकसंहिता, सूत्रस्थानम् 9/26
4. अष्टाङ्गसंग्रहः उ., 50 अ.

उपर्युक्तवचनेन प्रतिपादितं यत्, योगदर्शने वर्णितः चतस्रः वृत्तयः साधकमात्रमपि निरूपणं करणीयम्, तद्वदेव आयुर्वेदशास्त्रेऽपि चत्वारवैद्यस्य प्रतिपादनमस्ति। अत्र स्पष्टं भवति यत्, आयुर्वेदशास्त्रे चिकित्सायाः विनियोगं दृष्ट्वा योगस्योपादेयप्रक्रियायाः निरूपणं प्राप्यते।

## चतुर्विधं प्रमाणम्

भारतीयसंस्कृतेः प्राणस्वरूपमस्ति भारतीयदर्शनशास्त्रम्। प्रमाणेन प्रमेयस्य सिद्धिरिति दार्शनिकानां विचारः। अतः ते कारणं प्रमाणैरात्मा-प्रकृति-परमात्मा-स्वर्ग-मोक्ष-सृष्टि-प्रलय-पुनर्जन्मादीनि सूक्ष्मातिसूक्ष्मतत्त्वानि यथार्थरूपेण ज्ञातवन्तः। प्रमाणैर्वस्तोः यथार्थस्वरूपं ज्ञातुं शक्नोति जिज्ञासु। एभिः पारलौकिकजागतिकसत्यासत्यं च निर्णितुं शक्यते। प्रमाणाभावेन वस्तूनां यथार्थज्ञानं न भवति।

आयुर्वेदशास्त्रेऽपि आध्यात्मिक-दार्शनिकविषयानां विवेचनकाले प्रमाणानां आलोचनास्ति। शास्त्रेऽस्मिन् प्रमाणाय 'परीक्षा' इति शब्दस्य प्रयोगः दृश्यते। चरकसंहितायाः टीकाकारेण चक्रपाणिदत्तेन स्वस्य टीकायां 'परीक्षा' इति शब्दविषये कथितम्- 'परीक्ष्यते व्यवस्थाप्यते वस्तुस्वरूपमनयेति परीक्षा'[1] इति। अर्थात् यया पाञ्चभौतिकविषयस्वरूपं व्यवस्थितरूपेण निरूपितो भवति सा परीक्षा। प्रमाणं हि पदार्थानां वास्तविकस्वरूपस्य बोधं कारयति। अतः वक्तुं शक्ये यत् प्रमाणं परीक्षा वेति शब्दयोः पृथगर्थः नास्ति, तौ अभिन्नार्थकौ। विषयेऽस्मिन् महर्षिणा चरकेणोक्तम्- 'द्विविधमेव खलु सर्वं सच्चासच्च, तस्य चतुर्विधा परीक्षा- आप्तोपदेशः प्रत्यक्षमनुमानं युक्तिश्चेति'।[2] पाञ्चभौतिकसंसारेऽस्मिन् 'सदसदे'ति द्विविधो विषयः। तत्र विधिविषयप्रमाणगम्यं भावरूपमिति सत्पदस्यार्थः। एवमसत् निषेधविषयप्रमाणगम्यम-भावरूपस्यार्थं प्रकटयति। द्विविधविषयस्य परीक्षा चतुर्विधो भवति। तद्यथा- 1. आप्तोपदेशः, 2. प्रत्यक्षः, 3. अनुमानम्, 4. युक्तिश्चेति। परन्तु प्रत्यक्ष-अनुमानागमानि त्रीणि प्रमाणानि। तत्र युक्तिपरीक्षामनुमाने स्वीकरोतीति। अत एव तयोः शास्त्रयोः आधारेण वक्तुं पार्यते यत् प्रमाणानां स्वरूपतः नास्ति भेदः।

## आयुर्वेदानुसारं सृष्टिक्रमः

सृष्टितत्त्वविषये योगायुर्वेदयोर्मध्ये प्रायशः साम्यं परिलक्ष्यते। आयुर्वेदाचार्याः चतुर्विंशतिः तत्त्वानि स्वीकुर्वन्ति। एतेषां मध्ये यथा पृथिव्यप्तेजवाय्वाकाशबुद्ध्य-व्यक्ताहंकाराः इमानि अष्ट तत्त्वानि प्रकृतिरिति, अपि च षोडशतत्त्वानि यथा पञ्च ज्ञानेन्द्रियाः (चक्षुकर्णनासिकाजिह्वात्वचश्चेति) पञ्च कर्मेन्द्रियाः (वाक्पाणीपाद-

---

1. चरकसंहिता, सूत्रस्थानम् 11/17 चक्रपाणिदत्तः
2. चरकसंहिता, सूत्रस्थानम् 11/17

पायूपस्थश्चेति) पञ्च अर्थाः (शब्दस्पर्शरूपरसगन्धार्थश्चेति) मनश्च विकृतिः तत्त्वानि भवन्ति। एभिः तत्वैः अस्य जगतः सृष्टिरिति तेषां विचारः। एषां नामान्युल्लिख्य चरकेण कथितम्-

**खादीनि बुद्धिरव्यक्तमहंकारस्तथाष्टमः।**
**भूतप्रकृतिरुदिष्टा विकारश्चैव षोडश॥**

**बुद्धीन्द्रियाणि पञ्चैव पञ्च कर्मेन्द्रियाणि च।**
**समनस्काश्च पञ्चार्था विकारा इति संज्ञिताः॥**[1]

तथा च-

**पुनश्च धातुभेदेन चतुर्विंशतिकः स्मृतः।**
**मनो दशेन्द्रियाण्यर्थाः प्रकृतिश्चाष्टधातुकी॥**[2]

कस्मात् परं कस्योत्पत्ति इति विषयं स्पष्टीकृत्वा चरकाचार्यः सृष्टेः क्रमविषये कथितम् -

**जायते बुद्धिरव्यक्ताद् बुद्ध्याऽहमिति मन्यते।**
**परं खादीन्यहङ्कारदुत्पद्यन्ते यथाक्रमम्॥**

**ततः सम्पूर्ण सर्वाङ्गो जातोऽभ्युदित उच्यते॥**[3]

अर्थात् अव्यक्तात् बुद्धेः, बुद्धितत्त्वादहंकारस्य, अहंकारात् यथाक्रमं सूक्ष्मपञ्चमहाभूतस्योत्पत्तिर्भवति। ततः सम्पूर्णाङ्गस्य उत्पत्तिकारणात् 'जातः' इति नाम्नाभिधीयते।

अतः योगाचार्याः यदा षड्-विंशतिः तत्त्वानि स्वीकुर्वन्ति तदा आयुर्वेदाचार्याणां मते तत्त्वानि चतुर्विंशतिः इति। एभिः तत्वैः अस्य जगतः सृष्टिरिति तेषां विचारो वर्तते। आयुर्वेदे सृष्टेरुत्पत्तेः प्रक्रियायां प्रकृति-पुरुषयोः संयुक्तरूपेण सहावस्थानं स्वीकृतवान्। अत्राव्यक्तेति पदेन प्रकृति-पुरुषयोर्ग्रहणं करणीयम्। योगाचार्येणाव्यक्तेति पदेन केवलं मूलप्रकृतेर्ग्रहणं कृतम्। परन्त्वायुर्वेदाचार्याः पुरुषोपहितायाः प्रकृतेर्ग्रहणं कृतवृन्तः। आयुर्वेदे चतुर्विंशतिः तत्त्वेषु भौतिकाः भवन्तीन्द्रियाणि। योगमते तु भौतिकाः इन्द्रियाणि अहंकारिकाः न भवन्ति।

### योगिनां शक्तिः

आयुर्वेदे यत्र योगं मुक्तेः साधनमार्गरूपेण योगस्योल्लेखः तत्रैव मुक्तेः प्राक् योगीनां प्राप्तानां सिद्धीनामुल्लेखो वर्तते। यदा साधका अष्टाङ्गयोगैः साधनां कृत्वा

1. चरकसंहिता, शारीरस्थानम् 1/63-64
2. चरकसंहिता, शारीरस्थानम् 1/17
3. चरकसंहिता, शारीरस्थानम् 1/66-67

अन्तिमावस्थायां गच्छन्ति तदा तेषां योगसिद्धिर्भवति। तदानीं योगिषु लक्षणविशिष्ट-स्याविर्भावो भवति। इदं लक्षणविशिष्टं साधारणानां मानवानां मध्ये न जायते। एतत् खलु योगिनां स्वाभाविकी सिद्धिः या 'योगबलमि'ति नाम्ना प्रसिद्धम्। आयुर्वेदेऽष्टौ योगबलानि स्वीकृतानि सन्ति। तद्यथा- आवेश अर्थात् परकायप्रवेशः, चेतस अर्थात् परचित्तज्ञानम्, अर्थानां छन्दसः क्रिया अर्थात् शब्द-स्पर्श-रूप-रस-गन्धार्थानां यथानुकूलं ज्ञानम्, दृष्टि अर्थादतीन्द्रियस्य दर्शनम्, श्रोत्रमर्थादतीन्द्रियस्य श्रवणम्, स्मृति अर्थात् सर्वभावतत्त्वस्मरणम्, कान्तिः इष्टतश्चाप्यदर्शनञ्चेति। तदुक्तं महर्षिणा चरकेण शारीरस्थाने-

**आवेशश्चेतसो ज्ञानमर्थानां छन्दतः क्रिया।**
**दृष्टिः श्रोतं स्मृतिः कान्तिरिष्टतश्चाप्यदर्शनम्।।**
**इत्यष्टविधमाख्यातं योगिनां बलमैश्वरम्।**
**शुद्धसत्वसमाधानात्तत्सर्वमुपजायते।।**[1] इति

एभिः अष्टैश्वर्यैः योगीनां दिव्यबलमुपजायते। शुद्धः सत्व-रज-तमशून्यः मनसः साधनेन संयमेन वा आत्मनि स्थिररूपेण यदा स्थापयितुं समर्थो योगिः भवति तदा तस्मिन् साधके एषां बलानामुत्पत्तिर्जायते।

## मोक्षस्य परिभाषा

योगो मोक्षश्च पृथक् पृथक् द्वे अवस्थे। योगावस्थायां मानवानां शरीरं विद्यते। देहमाधारं मत्वा मनः, इन्द्रियाणि, आत्मा च तत्र विद्यन्ते। शरीरमनसी आत्माधीनौ। परन्तु मोक्षे न शरीरं वर्तते। न मनः न वा इन्द्रियाणि विद्यन्ते। आत्मैतेभ्यो सदा मुक्तरूपेण वर्तते। आयुर्वेदे मोक्षस्य स्वरूपविषये उक्तम्-

**मोक्षो रजस्तमोऽभावात् बलवत्कर्मसंक्षयात्।**
**वियोगः सर्वसंयोगैरपुनर्भव उच्यते।।**[2]

एवं योगस्य समाध्यवस्थायां यदा मनसो रजस्तमसोः गुणाभावो भवति तदा मनसि केवलं सत्त्वगुणो हि विराजते। तदात्मनि नवकर्मणः संयोगोऽपि न भवति। समाधिना पूर्वार्जितस्य कर्मणो विनाशे जाते आत्मा संसाराद्विमुच्यते। इयमवस्था मोक्षः इति कथ्यते।

## मोक्षसाधनानि

योगशास्त्रे यमनियमादि-अष्टाङ्गाः मोक्षस्य प्रारम्भिकसाधनानि भवन्तीति निर्दिष्टानि सन्ति। एषां पालनेन मानवानामाचरणे मनसि च शुद्धतायाति, मनसि

1. चरकसंहिता, शारीरस्थानम् 1/140-141
2. चरकसंहिता, शारीरस्थानम् 1/142

सात्त्विकभावस्योदयो भवति। आत्मा निर्मलतां प्राप्य शनैः शनैः मोक्षमार्गं प्रति तल्लीनं भवितुं वा गच्छति। आयुर्वेदेऽपि मोक्षसाधनस्य प्राथमिकोपायरूपेण यम-नियमयोरुल्लेखः अस्ति। तद्यथोक्तम् -

**सतामुपासनं सम्यगसतां परिवर्जनम्।**
**व्रतचर्योपवासश्च नियमाश्च पृथग्विधाः॥**
**धारणं धर्मशास्त्राणां विज्ञानं विजने रतिः।**
**विषयेष्वरतिर्मोक्षे व्यवसायः परा धृतिः॥**
**कर्मणामसमारम्भः कृतानां चा परिक्षयः।**
**नैष्क्रम्यमनहङ्कारः संयोगे भयदर्शनम्॥**
**मनोबुद्धिसमाधानमर्थतत्त्वपरीक्षणम्।**
**तत्त्वस्मृतेरूपस्थानात् सर्वमेतत्प्रवर्तते॥**[1]

अर्थात् सज्जनानां सङ्गतिः, खलानां दुष्टानां वा सङ्गपरित्यागः, चान्द्रायणादि-व्रतपालनम्, आत्मनिर्मलार्थमुपवासं करणम्, नियमानां पालनम्, धर्मशास्त्राणामभ्यासः, प्रमाणेन यथार्थज्ञानोपलब्धिः, एकान्तवासः, काम-क्रोधादिनां नित्यः परित्यागः, मोक्षसाधककर्मणि प्रवृत्तिः, उत्तमकर्मणः साधनम्, नित्य-नैमित्तिककार्याणां समारम्भः, अहंकारस्य सदैव परित्यागः, ममेदमहमस्मीत्यादिबुद्धिवर्जनम्, तत्त्वार्थस्य परीक्षापूर्वकं ग्रहणादिकं पालयित्वा साधकः यथार्थज्ञानं लभते। तदनन्तरं मोक्षपथि प्रवृत्तिर्भवति।

महर्षेः चरकस्य वचनाज्ज्ञायते यन्मोक्षस्य पूर्वावस्था हि योगोऽतो योगः खलु मोक्षस्य साधनमिति। अत्र योगो न खलु मोक्षः परन्तु योगस्यान्तिमावस्था हि मोक्षः। योगे केवलं शरीरावस्थायां सर्वासां चित्तवृत्तीनामथवा सर्वासां वेदनानां नाशो भवति। मोक्षावस्थायां तु भौतिकशरीरस्य नाशो भवति। मुक्तः पुरुषः जन्म-मरणचक्रेऽस्मिन् संसारे पुनः पुनः नागच्छति। अयं ह्यात्मनो मोक्षस्य चरमो लक्ष्यः। आयुर्वेदानुसारं योगो हि मोक्षस्य सहायकः। अतो योगेन मोक्षेण च सर्वासां वेदनानां विनाशो भवतीति।

**फलप्राप्तिः**

योगशास्त्रे ऐहिकपारलौकिकफललाभाय महत्त्वपूर्णादिशा निर्दिष्टा चास्ति। तत्र प्रसङ्गे योगिनः कथं मुक्तिं प्राप्यते, केन साधनेन ऐहिकफलं झटिति लभ्यते तस्य विचारः शास्त्रेऽस्मिन् कृतः। उक्तञ्च योगसूत्रे- 'तद्वैराग्यादपि दोषबीजक्षये कैवल्यम्',[2] 'सत्त्वपुरुषषोः शुद्धिसाम्ये कैवल्यमि'[3]ति। एवं प्रकारेण मोक्षात्मकं

1. चरकसंहिता, शारीरस्थानम् 1/143-146
2. योगसूत्रम् 3/50
3. योगसूत्रम् 3/55

सिद्धिविशेषं फलं दर्शयति। ततश्च संसारोच्छित्तिः परमानन्दप्राप्तिश्च करतले तिष्ठति। साधकः दिव्यमविनश्वरममृतपदं प्राप्नोति। ते च विषयाः आयुर्वेदशास्त्रेऽपि समानतया स्वीकृताः सन्ति। तत्रायुर्वेदस्य परिभाषायामेव सर्वजीवकल्याणविषयो निहितः अस्तीति निरूपितम्। आयुर्वेदानुसारं तत्त्वानुभूतिमात्यन्तिकज्ञानस्य कारणमस्ति। एवमेव बुद्ध्यहंकारशरीरादिभ्यो नश्वरभावपदार्थेभ्यो मुक्तो भूत्वा आत्यन्तिकज्ञानस्याधिकारी भवति। तज्ज्ञानमेव सत्याबुद्धिरिति कथ्यते। जीवस्य अस्यामवस्थायां रागद्वेषादीनां जागतिकविकाराणां विनाशो भवति। तदनन्तरं साधकः पूर्णतः सत्त्वगुणयुक्तो भूत्वा निवृत्तिमार्गमवलम्ब्य अपवर्गं प्राप्नोतीति आयुर्वेदाचार्यस्याभिमतम्। फलप्राप्तिविषये योगायुर्वेदयोर्मध्ये किञ्चित् स्वरूपतः नास्ति भेदः। अपितु तयोः शास्त्रयोः तुलनात्मकदृष्ट्या वक्तुं पार्यते यत् केवलं शाब्दिकभेदः वर्तते न तु तात्त्विकभेदः।

**आकरग्रन्थाः**

**मूलग्रन्थाः**

1. चरकसंहिता. महर्षिचरकः, (पूर्वार्द्धः उत्तरर्द्धश्च) सम्पा... प्रो. रामहर्ष सिंह, श्रीचक्रपाणिदत्तविरचितया चौखम्बा सुरभारती प्रकाशन, वाराणसी, संस्करणम्- 2019।
2. पातञ्जलयोगदर्शनम्. महर्षिपतञ्जलिः, वाचस्पतिमिश्र विरचित तत्त्ववैशारदी, विज्ञानभिक्षु कृत योगवार्तिक व्यासभाष्य श्रीनारायणमिश्र, भारतीय विद्या प्रकाशन, वाराणसी, संस्करण, 1998 सन्।
3. पातञ्जलयोगप्रदीप. श्रीस्वामी ओमानन्दतीर्थः, गीताप्रेस, गोरखपुर, अष्टविंश पुनर्मुद्रण वि.सं.- 2064।
4. योगभाष्यम्. व्यासः, सं...नारायणमिश्रः, भारतीय विद्या प्रकाशन, वाराणसी, 1971 सन्।
5. सुश्रुतसंहिता. महर्षिसुश्रुतः, हिन्दी व्याख्या...कविराज, अम्बिकादत्त शास्त्री, चौखम्बा संस्कृत संस्थान, वाराणसी, षष्ठ संस्करणम्- 1987।

**आधुनिकग्रन्थाः**

1. अभेदानन्द, स्वामी, योगशिक्षा (बङ्गभाषया विरचितम्), रामकृष्ण वेदान्त मठ, कलकाता-06, एकादश संस्करणम्, मार्च- 2009।
2. उपाध्याय, श्रीबलदेव. संस्कृतवाङ्मय का बृहत् इतिहास, सप्तदश-खण्ड, उत्तर प्रदेश संस्कृत संस्थान, लखनऊ, वि.सं.- 2063।

3. गुप्त, डॉ. भागवतराम. आयुर्वेद का प्रामानिक इतिहास, चौखम्बा कृष्णदास, अकादमी, वाराणसी, द्वितीय संस्करण, वि.सं.- 2059, सन् 2003।

4. जैन, आचार्यराजकुमार. योग और आयुर्वेद, चौखम्भा ओरियन्टालिया, दिल्ली, प्रथम संस्करण, 2019।

5. ढुङ्गेलः, डाँ. धरणी. योगदर्शने स्वास्थ्यविज्ञानम्, प्रतिभा प्रकाशन, दिल्ली, प्रथमसंस्करणम्- 2014।

6. Frawley, David. Yoga & Ayurveda, Motilal Banarsidass Publishers Private Limited, Delhi, 2000.

✦✦✦

**संस्कृतविमर्शः** - यु.जी.सी. केयर-मानिता विद्वत्परिशीलिता अन्ताराष्ट्रीया षाण्मासिकी शोधपत्रिका केन्द्रीयसंस्कृतविश्वविद्यालयेन प्रकाश्यते। प्रकाशनेच्छुभिः शोधपत्रं Unicode Font माध्यमेन 14अक्षराकारेण संस्कृतसाहित्यसंबद्धशोधलेखाः संस्कृतम्, हिन्दी आङ्ग्लम् वा भाषया विलिख्य Sanskrit.nic.in इति जालपुटे स्थापित-www.rsif.csu.co.in पोर्टलद्वारा प्रेषयितुं शक्यन्ते। साक्षात् प्रेषितः शोधलेखः प्रकाशनाय नानुमन्यते। विद्वद्भिः अनुशीलनात् परम् अनुमतानां शोधलेखानां प्रकाशनार्हता निर्धारिता भवति।

**Copyright** - केन्द्रीयसंस्कृतविश्वविद्यालयः, देहली।

मूल्याङ्कनसमित्या निर्धारितशोधलेखेषु निहिताः सर्वोपि विषयः सत्यतथ्यरूपेणैवाङ्गीक्रियते। लेखेषु विद्यमानायाः मौलिकतायाः विषये मूललेखकः उत्तरदायी भवति। मौलिकतायाः विवादः स्यात् तर्हि लेखक एव न्यायालयस्य उत्तरदायी भवति। अधिकविवरणज्ञानार्थं विश्वविद्यालयस्य Sanskrit.nic.in द्रष्टुं शक्नुवन्ति।

संपर्कः - शोधप्रकाशनविभागः, केन्द्रीयसंस्कृतविश्वविद्यालयः, देहली
**Email : res-pub@csu.co.in**

**केन्द्रीयसंस्कृतविश्वविद्यालयः**

**संसदः अधिनियमेन स्थापितः**

56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी, नवदेहली-110058

दूरभाष : 011-28524993, 28521994, 28520977

email : res-pub@csu.co.in, sales@csu.co.in
website : www.sanskrit.nic.in